श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकूरनाथश्रीवत्सचिह्नमिश्र विरचितम्

# ॥ प्रार्थनापञ्चकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ प्रार्थनापञ्चकम् ॥

यतीश्वर शृणु श्रीमन् कृपया परया तव।
मम विज्ञापनमिदं विलोक्य वरदं गुरुम्॥ १,॥

अनादि पापरचितां अन्तःकरण निष्ठिताम्।
यतीन्द्र विषये सान्द्रां विनिर्वासय वासनाम्॥ २॥

अपि प्रार्थयमानानां पुत्रक्षेत्रादि संपदाम्।
कुरु वैराग्य मेवात्र हितकारिन् यतीन्द्र नः॥ ३॥

यथाऽपराधा नस्स्युर्मे भक्तेषु भगवत्यपि।
तथा लक्ष्मण योगीन्द्र यावद्देहं प्रवर्तय॥ ४॥

आमोक्षं लक्ष्मणार्य त्वत्प्रबन्ध परिशीलनैः।
कालक्षेपोऽस्तुनस्सद्भिः सहवासमुपेयुषाम्॥ ५॥

इत्येतत्सादरं विद्वान् प्रार्थना पञ्चकम् पठन्।
प्राप्नुयात् परमां भक्तिं यतिराज पदाब्जयोः॥ ६॥

॥ इति प्रार्थनापञ्चकं समाप्तम्॥